चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्त्रियस्य तु।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा॥"
इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः॥

मण्डलं, त्रि, विम्बम्। इत्यमरः। ३।३।१५। हे चन्द्रस्य शरीरे उपचारादादित्यस्य च। वेति शोभते विम्बः पीलुकान्तिगत्यादौ नाम्नीति विम्बः। विम्बति भाति विम्बः। सौत्रोऽयमिति स्वामी। मण्डयति मण्डलं नाम्नीति अलः स्त्रियां नदादित्वात् मण्डली च। इति भरतः॥

मण्डलः, पुं, (मण्डं लाति गृह्णातीति। ला+कः।) कुक्कुरः। इति मेदिनी। ले, १२१॥ सर्पविशेषः। इति विश्वः॥ (देहस्याष्टप्रकारसन्ध्यन्तर्गतसन्धिविशेषः। "त एते सन्धयोऽष्टविधाः। कोरोदूखल-सामुद्ग-प्रतर-तुन्नसेवनीवायसतुण्ड-मण्डल-शङ्खावर्त्ताः।" 'कण्ठहृदयनेत्रक्लोमनाड़ीषु मण्डलाः।' इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

मण्डलकं, क्ली, (मण्डल। स्वार्थे कन्।) विम्बम्। कुष्ठभेदः। दर्पणम्। इति मेदिनी। के, २०७। मण्डलाकारव्यूहः। इति जटाधरः॥

मण्डलकः, पुं, (मण्डल। स्वार्थे कन्।) कुक्कुरः। इति धरणिः॥

मण्डलनृत्यं, क्ली, (मण्डलेन मण्डलाकारेण प्रवर्त्तितं नृत्यमिति नित्यसमासः।) मण्डलाकारनृत्यम्। तत्पर्य्यायः। हल्लीषः २॥ इति शब्दमाला॥

मण्डलपत्त्रिका, स्त्री, (मण्डलं मण्डलाकारं पत्त्रं यस्याः। कन्। टाप्। अत इत्वञ्च।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः॥)

मण्डलाग्रः, पुं, (मण्डलं गोलाकारं अग्रं यस्य।) खड्गः। इत्यमरः। २। ८। ८९॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये। तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च।)

मण्डलायितं, क्ली, (मण्डलवदाचरितमिति। मण्डल+क्यङ्। दीर्घः। मण्डलाय नामधातुः क्तः।) वर्त्तुलम्। इति शब्दरत्नावली॥

मण्डलाधीशः, पुं, (मण्डलस्य अधीशः।) मण्डलेश्वरः। तत्पर्य्यायः। मध्यमः २। इति हेमचन्द्रः॥

मण्डली, [न्] पुं, (मण्डलं कुण्डलनं कुण्डलाकारेण शरीरवेष्टनमस्त्यस्येति। मण्डल+इनिः।) सर्पः। इति त्रिकाण्डशेषः॥ विड़ालः। इति शब्दमाला॥ नाटकः। इति हेमचन्द्रः। खट्टाश इति भाषा। वटवृक्षः। गोनाशसर्पः। इति राजनिर्घण्टः॥

मण्डली, स्त्री, (मण्डलमस्त्यस्या इति। अर्श आद्यच्। गौरादित्वात् ङीष्।) दूर्व्वा। इति शब्दावली॥ (स्त्री, गुडूची॥ तत्पर्य्यायो यथा,
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च।
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।



चक्रलक्षणिकाधीरा विशल्या च रसायनी॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मण्डलेशः, पुं, (मण्डलस्य ईशः।) मण्डलेश्वरः। तत्पर्य्यायः। एकजन्मा २ भयापहः ३। इति त्रिकाण्डशेषः॥

मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः।) भूम्येकदेशाधिपः। अन्यो भूम्येकदेशाधिपो मण्डलेश्वरः स्यात् मण्डलस्य अरिमित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः। एकदेशाधिप इत्यर्थः। स्यान्मण्डलं द्वादशराजके च देशे च विम्बे च कदम्बके च। इति विश्वः॥ इत्यमरटीकायां भरतः॥ तस्य लक्षणान्तरम्।
"चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः॥

मण्डहारकः, पुं, (मण्डं हरति आहरति गृह्णातीति। हृ+"ण्वुल्तृचौ।" ३। १। १३३। इति ण्वुल्। सुरासम्पादनार्थं मण्डग्रहणादस्य तथात्वम्।) शौण्डिकः। इत्यमरः। १। २। १०॥

मण्डा, स्त्री, (मण्डः कारणत्वेनास्ति अस्या इति अर्शआदिभ्योऽच्। टाप्।) सुरा। इति हारावली॥ (मण्डयतीति। मडि+अच्। टाप्।) आमलकी। इति मेदिनी। डे, २२॥

मण्डितः, पुं, बौद्धगणाधिपविशेषः।" इति हेमचन्द्रः। (मडि+कर्म्मणि क्तः।) भूषिते त्रि। इत्यमरः। ३। २। १००॥ (यथा, गीतगोविन्दे। २। ७।
"मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम्।")

मण्डूकः, पुं, (मण्डयति भूषयति जलाशयमिति मडि+"शलिमण्डिभ्यामूकण्" उणा० ४। ४२। इति ऊकण्।) भेकः। इत्यमरः। १। १०। २४॥ (यथा, मनुः। ४। १२६।
"पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम्॥"
भेकार्थे पर्य्यायो गुणाश्च यथा,—
"मण्डूकः प्लवगो भेको वर्षाभूर्द्दर्दुरो हरिः।
मण्डूकः श्लेष्मलो वातपित्तघ्नो बलकारकः॥'
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
शोणकः। मुनिविशेषः। इति मेदिनी। के, १३६॥ नाड़ीभेदः। इति शब्दरत्नावली॥ बन्धविशेषे क्ली। इति विश्वः॥ (अश्वजातिभेदः। यथा, महाभारते। २। २८। ६।
"तत्र तित्तिरिकल्माषान् मण्डूकाख्यान् हयोत्तमान्।")

मण्डूकपर्णः, पुं, (मण्डूकाकृति पर्णमस्य। यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य।) श्योनाकवृक्षः। इत्यमरः। ४। २। ५६॥ (तथाचास्य पर्य्यायः॥
"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकः।
मण्डूकपर्णपत्त्रोर्णशुकनासकुटन्नटाः॥



दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
शोणकः। इति मेदिनी। णे, ११५॥

मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण। गौरादित्वात् ङीष्।) मञ्जिष्ठा॥ (यथास्याः पर्य्यायः।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी॥")
ब्राह्मी इति मेदिनी। णे, ११५॥ आदित्यभक्ता। इति राजनिर्घण्टः॥ ओषधिविशेषः। थुलकुड़ी इति भाषा। तत्पर्य्यायः। भेकी २ मण्डूकी ३ मलपर्णी ४। इति रत्नमाला॥ मण्डूकपर्णिका ५। अस्या गुणाः। मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा। (महौषध्यर्थे पर्य्यायान्तरं यथा,—
"मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तथाचास्या गुणाः॥
कषाया तु हिता पित्ते स्वादुपाकरसा हिमा।
लघ्वी मण्डूकपर्णी तु तद्वद्गोजिह्विका मता॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
पाठान्तरम्। मण्डूकपर्णिका लघ्वी हृद्या वातविबन्धनुत्। इति राजवल्लभः॥

मण्डूकमाता, [ऋ] स्त्री, (मण्डूकस्य मातेव मण्डूकपोषकत्वादस्यास्तथात्वम्।) ब्राह्मी। इति राजनिर्घण्टः॥ भेकमाता च॥

मण्डूका, स्त्री, (मण्डूक+स्त्रियां टाप्।) मञ्जिष्ठा। यथा, शब्दमालायाम्।
"मण्डूका च लता यष्टिर्हेमपुष्पी च भण्डिरी।"

मण्डूकी, स्त्री, (मण्डूक+स्त्रियां ङीष्।) मण्डूकपर्णी। इति मेदिनी। के, १३७॥ आदित्यभक्ता। ब्राह्मी। इति राजनिर्घण्टः॥ क्षुपविशेषः। इति रत्नमाला॥ थुलकुड़ी। इति भाषा। भ्रष्टयोषित्। इति शब्दरत्नावली॥

मण्डूरं, क्ली, पुं, लौहमलम्। तत्पर्य्यायः। शिङ्घाणम् २। इत्यमरः। २। ९। ९८॥ सिंहानं ३। सिंहाणं ४। मण्डते लौहं वेष्टते अचिरादेव लोहादिभक्षणं वा मण्डयति भूषयति औषधत्वाद्रोगिणमिति वा मण्डूरं कि मडि भूषे मडि इ विभागे वेष्टे नाम्नीति ऊरः। इति तट्टीकायां भरतः॥ अस्य गुणः। लौहगुणतुल्यः। शतवर्षीयं मण्डूरमुत्तमम्। अशीतिवर्षीयं मध्यमम्। षष्टिवर्षीयमधमम्। अतो न्यूनं विषतुल्यम्। यथा,—
"यल्लौहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणम्।
शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्॥
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥"
इति रसेन्द्रचिन्तामणिः॥
(तथा चास्य पर्य्यायान्तरम्। मण्डूरं लौहजं किट्टम्। इति वैद्यकरत्नमालायाम्॥ अस्य उत्पत्तिर्गुणाश्च यथा,—